Shri SantoshimatuH AshtottarashatanamavaliH 108 Names

# श्रीसन्तोषीमातुरष्टोत्तरशतनामावलिः

## Document Information

Text title : Shri Santoshimata Ashtottarashata Namavali 108 Names

File name : santoShImAturaShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, otherforms

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA EASWARAN psaeaswaran at gmail.com

Description/comments : See corresponding stotra

Latest update : January 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 1, 2020

*sanskritdocuments.org*

# श्रीसन्तोषीमातुरष्टोत्तरशतनामावलिः

ॐ सन्तोषजनन्यै नमः । मात्रे । सर्वसम्पत्प्रदायिन्यै ।
सामादिवेदसंस्तुत्यायै । समानादिकवर्जितायै ।
अकारादिक्षकारान्तायै । आद्यन्तरहितायै । अङ्गनायै ।
अम्लानवदनायै । आम्लम्लायमानमुखाम्बुजायै । करुणायै । कारणायै ।
कार्यायै । काशीक्षेत्रविराजितायै । कथाश्रवणसन्तुष्टायै ।
कामितार्थप्रदायिन्यै । कालदेशापरिच्छिन्नायै । कालकालायै ।
कुटुम्बजायै । गुणत्रयस्वरूपायै नमः । २०

ॐ आर्यायै नमः । गुणभक्तगणार्चितायै । गुणग्रामायै । गुणाराध्यायै ।
गुणारामायै । गुणाश्रयायै । गृहार्चितायै । गृहाराध्यायै ।
गृहस्थजनपोषिण्यै । जयायै । जयप्रदायै । जप्यायै । जनन्यै ।
जन्मवर्जितायै । जीवितायै । जीवनायै । जीव्यायै । जीवलोकसुखङ्कर्यै ।
नमस्कारप्रियायै । नम्यायै नमः । ४०

ॐ नादिन्यै नमः । विश्वमोहिन्यै । पुण्यायै । पुण्यप्रदायै ।
पुण्यलब्धायै । पुरुजनाश्रितायै । भवायै । भवान्यै ।
भव्यस्थायै । भामिन्यै । भाविराजितायै । भाग्यदायै । भारत्यै ।
भाव्यायै । भार्यापुत्रसुखप्रदायै । मायायै । मान्यायै । महादेव्यै ।
महादेवसुतोद्भवायै । मत्यै नमः । ६०

ॐ दान्त्यै नमः । कृत्यै । कीर्त्यै । धृत्यै । कान्त्यै । गत्यै ।
स्मृत्यै । मधुरायै । मधुरप्रीतायै । मथुरानाथसंस्तुतायै ।
विजयायै । विश्वसंसेव्यायै । विज्ञायै । विज्ञानदायिन्यै । शक्तायै ।
शक्तिस्वरूपायै । शाम्भव्यै । शम्भुलालितायै । शल्यादिदोषहन्त्र्यै ।
शमादिगुणसेवितायै नमः । ८०

ॐ विघ्नहन्त्र्यै नमः । विघ्ननाथायै । विघ्नराजकुलोद्भवायै ।
शरण्यायै । शारदायै । शीतायै । शूलखड्गधरायै । अम्बिकायै ।

शुभायै । शुभप्रदायै । शुद्धायै । शुक्रवारव्रतार्चितायै ।
शोभनायै । शोभनाकारायै । शोभमानमुखाम्बुजायै ।
श्रीप्रदायै । श्रीनिध्यै । श्रीशायै । श्रितमानसतोषदायै ।
सिद्धिबुद्धिसुधासेव्यायै नमः । १००

ॐ सिद्धये नमः । बुद्धये । हितप्रदायै । क्षमारूपायै ।
क्षमाधारायै । क्षान्त्यै । शान्त्यै । शिवङ्कर्यै । १०८

ॐ सन्तोषीमात्रे नमः ।

फलश्रुतिः -
सन्तोषीमातुरित्येवं पुण्यमष्टोत्तरं शतम् ।
गदितं लोककल्याणदायकं सौख्यवर्धनम् ॥

शुक्रवारे विशेषेण पठित्वा मातृसन्निधौ ।
आरोग्यं भोगमैश्वर्यं सर्वान्कामानवाप्नुयात् ॥

इति श्रीसन्तोषीमातुरष्टोत्तरशतनामावलिः समाप्ता ।

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri SantoshimatuH AshtottarashatanamavaliH 108 Names*
pdf was typeset on January 1, 2020

Please send corrections to *sanskrit@cheerful.com*